**On Ghatakasha, upadhi, etc.**

श्रीगुरुभ्यो नमः

अद्वैतभाष्यादिवाङ्मये घटाकाशदृष्टान्तो जीवपरयोरौपाधिकभेदव्यवस्थापनार्थम् अतिव्यापकतया उपयुज्यते | अत्र तस्य दृष्टान्तस्य विविधदृष्टयो वाक्योदाहरणद्वारा प्रपञ्च्यन्ते | एतानि वाक्यानि पठनेन दृष्टान्तस्य बहुमुखपरिचयं प्राप्तुं शक्यते |

अत्र विशेषतोऽवगाह्यविषयः -

श्रीपद्मपादाचार्यकृतपञ्चपादिकायां एवमूचुः -

तेन ‘असङ्गो न हि सज्जते’ (बृ. उ. ३-९-२६) ‘असङ्गो ह्ययं पुरुषः’ (बृ. उ. ४-३-१५) इत्यादिश्रुतिसमर्पितासङ्गता आत्मनो न स्पष्टं दर्शितेति तदर्थं घटाकाशोदाहरणम् ।

तस्य व्याख्यानरूप - **वक्तव्यकाशिका**-प्रणेतारः **श्रीउत्तमज्ञाचार्याः** (शृङ्गेरीपीठाधिपतिचर-**ज्ञानोत्तमाचार्या** **(910-954 A.D)** णां शिष्यवर्याः एवं वदन्ति -

// श्रुतिषु घटाकाशोदाहरणेन किं प्रयोजनमित्याशङ्क्य आत्मनोऽसङ्गत्वसिद्धिः प्रयोजनमित्याह - तदर्थं घटाकाशोदाहरणमिति । //

प्रसिद्धदशोपनिषत्सु तु दृष्टान्तोऽयं नोक्तः | अन्योपनिषत्सु मृग्यमाणे कानिचन वाक्यानि उपलब्धानि घटाकाशदृष्टान्तसमर्पकानि | तानि अस्य प्रबन्धस्य अन्ते दीयन्ते |

Shri Gurubhyo Namah

In Advaita literature such as the bhashyas, the analogy of space within a pot (ghata-akasha) is extensively used to establish the distinction between the individual self and the Supreme Self as being merely due to limiting adjuncts (upadhis). Here, various perspectives on this analogy are elaborated through sample sentences. By reading these sentences, one can gain a multifaceted understanding of the analogy.

A point to be especially noted here:

In the Panchapadika authored by Acharya Padmapada (Shankaracharya's direct disciple), it is stated thus:

"Therefore, the scriptures like 'The unattached one is not tainted' (Brh. Up. 3.9.26), 'This Purusha is unattached' (Brh. Up. 4.3.15) establish the unattached nature of the Self. But this is not clearly shown. For that purpose, the analogy of space within a pot is given."

Expounding on this, Acharya Uttamajna, the author of Vaktavya-Kashika commentary (and the foremost disciple of Acharya Jnaanottama who presided over the Sringeri Peetham from 910-954 AD), says:

// Anticipating the question "What is the purpose of the pot-space analogy in the scriptures?", it is stated that establishing the unattached nature of the Self is the purpose - for that purpose the pot-space analogy is given. //

However, in the well-known ten principal Upanishads, this analogy is not mentioned. Upon searching in other Upanishads, a few statements have been found that convey the pot-space analogy. They are provided at the end of this essay.

Those who need the English/other languages translation of the passages below can try getting them done through this: https://claude.ai/chats

BSB ब्रह्मसूत्रभाष्यम् 1.1.5:

अत्रोच्यते — सत्यं नेश्वरादन्यः संसारी; तथापि देहादिसङ्घातोपाधिसम्बन्ध इष्यत एव, **घटकरकगिरिगुहाद्युपाधिसम्बन्ध इव व्योम्नः ।** तत्कृतश्च शब्दप्रत्ययव्यवहारो लोकस्य दृष्टः — **'घटच्छिद्रम्' 'करकच्छिद्रम्' इत्यादिः, आकाशाव्यतिरेकेऽपि; तत्कृता चाकाशे घटाकाशादिभेदमिथ्याबुद्धिर्दृष्टा;** तथेहापि देहादिसङ्घातोपाधिसम्बन्धाविवेककृतेश्वरसंसारिभेदमिथ्याबुद्धिः ।

BSB 1.1.17:

परमेश्वरस्तु अविद्याकल्पिताच्छारीरात्कर्तुर्भोक्तुः विज्ञानात्माख्यात् अन्यः । यथा मायाविनश्चर्मखड्गधरात्सूत्रेणाकाशमधिरोहतः स एव मायावी परमार्थरूपो भूमिष्ठोऽन्यः । यथा वा घटाकाशादुपाधिपरिच्छिन्नादनुपाधिपरिच्छिन्न आकाशोऽन्यः । ईदृशं च विज्ञानात्मपरमात्मभेदमाश्रित्य 'नेतरोऽनुपपत्तेः', 'भेदव्यपदेशाच्च' इत्युक्तम् ॥१७ ॥

BSB 1.2.20

एकस्यैव तु भेदव्यवहार उपाधिकृतः, यथा घटाकाशो महाकाश इति

BSB 2.1.14

**एवमविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवति, व्योमेव घटकरकाद्युपाध्यनुरोधि** । स च स्वात्मभूतानेव **घटाकाशस्थानीयानविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसङ्घातानुरोधिनो जीवाख्यान्विज्ञानात्मनः प्रतीष्टे व्यवहारविषये ।** तदेवमविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्येश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च, न परमार्थतो विद्यया अपास्तसर्वोपाधिस्वरूपे आत्मनि ईशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते ।

BSB 1.3.3

तस्माद्यथा लोके — आकाशं कुरु (make some space), आकाशो जातः (space is now available)— इत्येवंजातीयको गौणः प्रयोगो भवति, यथा च — घटाकाशः करकाकाशः गृहाकाशः — इत्येकस्याप्याकाशस्य एवंजातीयको भेदव्यपदेशो गौणो भवति —

BGB 15.12:

यस्य च पदस्य उपाधिभेदम् अनुविधीयमानाः जीवाः — घटाकाशादयः इव आकाशस्य — अंशाः,

Taittiriya bhashya: तैत्तिरीयोपनिषद्भाष्यम् -

सः यश्चासावादित्ये इति निर्दिश्यते । स एकः भिन्नप्रदेशघटाकाशाकाशैकत्ववत् ।

Mundaka 3.2.5 मुण्डकोपनिषद्भाष्यम् -

ते एवंभूताः सर्वगं सर्वव्यापिनम् आकाशवत् सर्वतः सर्वत्र प्राप्य, नोपाधिपरिच्छिन्नेनैकदेशेन ; किं तर्हि, तद्ब्रह्मैवाद्वयमात्मत्वेन प्रतिपद्य धीराः अत्यन्तविवेकिनः युक्तात्मानो नित्यसमाहितस्वभावाः सर्वमेव समस्तं शरीरपातकालेऽपि आविशन्ति भिन्नघटाकाशवदविद्याकृतोपाधिपरिच्छेदं जहति । एवं ब्रह्मविदो ब्रह्म धाम प्रविशन्ति ॥

Mundaka 3.2.6: मुण्डकोपनिषद्भाष्यम्

परामृताः परम् अमृतम् अमरणधर्मकं ब्रह्म आत्मभूतं येषां ते परामृता जीवन्त एव ब्रह्मभूताः, परामृताः सन्तः परिमुच्यन्ति परि समन्तात्प्रदीपनिर्वाणवद्भिन्नघटाकाशवच्च निवृत्तिमुपयान्ति परिमुच्यन्ति परि समन्तान्मुच्यन्ते सर्वे, न देशान्तरं गन्तव्यमपेक्षन्ते ।

Anandagiri: for the lamp analogy: तत्र आनन्दगिरिव्याख्या -

प्रदीपस्य वर्तिकृतावच्छेदध्वंसे यथा तेजःसामान्यतापत्तिस्तद्वदित्याह – **प्रदीपनिर्वाणवदिति ।**

**Mandukya karika bhashya 3. advaita prakaranam: many verses are there on akasha/upadhi, etc.:**

**माण्डूक्यकारिकायासु तथा तद्भाष्ये च बहूनि घटाकाशवाक्यानि सन्ति - तेनापि ज्ञायते शंकराचर्यपूर्वगौडपादाचार्यकालेऽपि एतद्दृष्टान्तप्रयोग आसीदिति।**

आत्मा ह्याकाशवज्जीवैर्घटाकाशैरिवोदितः ।
घटादिवच्च सङ्घातैर्जातावेतन्निदर्शनम् ॥ ३ ॥

अजाति ब्रह्माकार्पण्यं वक्ष्यामीति प्रतिज्ञातम् ; तत्सिद्ध्यर्थं हेतुं दृष्टान्तं च वक्ष्यामीत्याह — आत्मा परः हि यस्मात् आकाशवत् सूक्ष्मो निरवयवः सर्वगत आकाशवदुक्तः जीवैः क्षेत्रज्ञैः घटाकाशैरिव घटाकाशतुल्यैः उदितः उक्तः ; स एव आकाशसमः पर आत्मा । अथवा घटाकाशैर्यथा आकाश उदितः उत्पन्नः, तथा परो जीवात्मभिरुत्पन्नः ; जीवात्मनां परस्मादात्मन उत्पत्तिर्या श्रूयते वेदान्तेषु, सा महाकाशाद्घटाकाशोत्पत्तिसमा, न परमार्थत इत्यभिप्रायः । तस्मादेवाकाशाद्घटादयः सङ्घाता यथा उत्पद्यन्ते, एवमाकाशस्थानीयात्परमात्मनः पृथिव्यादिभूतसङ्घाता आध्यात्मिकाश्च कार्यकरणलक्षणा रज्जुसर्पवद्विकल्पिता जायन्ते ; अत उच्यते — घटादिवच्च सङ्घातैरुदित इति । यदा मन्दबुद्धिप्रतिपिपादयिषया श्रुत्या आत्मनो जातिरुच्यते जीवादीनाम् , तदा जातावुपगम्यमानायाम् एतत् निदर्शनं दृष्टान्तः यथोदिताकाशवदित्यादिः ॥

घटादिषु प्रलीनेषु घटाकाशादयो यथा ।
आकाशे सम्प्रलीयन्ते तद्वज्जीवा इहात्मनि ॥ ४ ॥

यथा घटाद्युत्पत्त्या घटाकाशाद्युत्पत्तिः, यथा च घटादिप्रलयेन घटाकाशादिप्रलयः, तद्वद्देहादिसङ्घातोत्पत्त्या जीवोत्पत्तिः तत्प्रलयेन च जीवानाम् इह आत्मनि प्रलयः, न स्वत इत्यर्थः ॥

यथैकस्मिन्घटाकाशे रजोधूमादिभिर्युते ।
न सर्वे सम्प्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः ॥ ५ ॥

सर्वदेहेष्वात्मैकत्वे एकस्मिन् जननमरणसुखदुःखादिमत्यात्मनि सर्वात्मनां तत्सम्बन्धः क्रियाफलसाङ्कर्यं च स्यादिति ये त्वाहुर्द्वैतिनः, तान्प्रतीदमुच्यते — यथा एकस्मिन् घटाकाशे रजोधूमादिभिः युते संयुक्ते, न सर्वे घटाकाशादयः तद्रजोधूमादिभिः संयुज्यन्ते, तद्वत् जीवाः सुखादिभिः । ननु, एक एवात्मा ; बाढम् ; ननु न श्रुतं त्वया आकाशवत्सर्वसङ्घातेष्वेक एवात्मेति ? यद्येक एवात्मा, तर्हि सर्वत्र सुखी दुःखी च स्यात् ; न चेदं साङ्ख्यस्य चोद्यं सम्भवति ; न हि साङ्ख्य आत्मनः सुखदुःखादिमत्त्वमिच्छति, बुद्धिसमवायाभ्युपगमात्सुखदुःखादीनाम् ; न चोपलब्धिस्वरूपस्यात्मनो भेदकल्पनायां प्रमाणमस्ति । भेदाभावे प्रधानस्य पारार्थ्यानुपपत्तिरिति चेत् , न ; प्रधानकृतस्यार्थस्यात्मन्यसमवायात् ; यदि हि प्रधानकृतो बन्धो मोक्षो वा अर्थः पुरुषेषु भेदेन समवैति, ततः प्रधानस्य पारार्थ्यमात्मैकत्वे नोपपद्यत इति युक्ता पुरुषभेदकल्पना ; न च साङ्ख्यैर्बन्धो मोक्षो वार्थः पुरुषसमवेतोऽभ्युपगम्यते, निर्विशेषाश्च चेतनमात्रा आत्मानोऽभ्युपगम्यन्ते ; अतः पुरुषसत्तामात्रप्रयुक्तमेव प्रधानस्य पारार्थ्यं सिद्धम् , न तु पुरुषभेदप्रयुक्तमिति ; अतः पुरुषभेदकल्पनायां न प्रधानस्य पारार्थ्यं हेतुः ; न चान्यत्पुरुषभेदकल्पनायां प्रमाणमस्ति साङ्ख्यानाम् । परसत्तामात्रमेव चैतन्निमित्तीकृत्य स्वयं बध्यते मुच्यते च प्रधानम् ; परश्चोपलब्धिमात्रसत्तास्वरूपेण प्रधानप्रवृत्तौ हेतुः, न केनचिद्विशेषेणेति, केवलमूढतयैव पुरुषभेदकल्पना वेदार्थपरित्यागश्च । ये त्वाहुर्वैशेषिकादयः इच्छादय आत्मसमवायिन इति ; तदप्यसत् , स्मृतिहेतूनां संस्काराणामप्रदेशवत्यात्मन्यसमवायात् , आत्ममनःसंयोगाच्च स्मृत्युत्पत्तेः स्मृतिनियमानुपपत्तिः, युगपद्वा सर्वस्मृत्युत्पत्तिप्रसङ्गः । न च भिन्नजातीयानां स्पर्शादिहीनानामात्मनां मनआदिभिः सम्बन्धो युक्तः । न च द्रव्याद्रूपादयो गुणाः कर्मसामान्यविशेषसमवाया वा भिन्नाः सन्ति । परेषां यदि ह्यत्यन्तभिन्ना एव द्रव्यात्स्युः इच्छादयश्चात्मनः, तथा सति द्रव्येण तेषां सम्बन्धानुपपत्तिः । अयुतसिद्धानां समवायलक्षणः सम्बन्धो न विरुध्यत इति चेत् , न ; इच्छादिभ्योऽनित्येभ्य आत्मनो नित्यस्य पूर्वसिद्धत्वान्नायुतसिद्धत्वोपपत्तिः । आत्मना अयुतसिद्धत्वे च इच्छादीनामात्मगतमहत्त्ववन्नित्यत्वप्रसङ्गः । स चानिष्टः, आत्मनोऽनिर्मोक्षप्रसङ्गात् । समवायस्य च द्रव्यादन्यत्वे सति द्रव्येण सम्बन्धान्तरं वाच्यम् , यथा द्रव्यगुणयोः । समवायो नित्यसम्बन्ध एवेति न वाच्यमिति चेत् , तथा सति समवायसम्बन्धवतां नित्यसम्बन्धप्रसङ्गात्पृथक्त्वानुपपत्तिः । अत्यन्तपृथक्त्वे च द्रव्यादीनां स्पर्शवदस्पर्शद्रव्ययोरिव षष्ठ्यर्थानुपपत्तिः । इच्छाद्युपजनापायवद्गुणवत्त्वे च आत्मनोऽनित्यत्वप्रसङ्गः । देहफलादिवत्सावयवत्वं विक्रियावत्त्वं च देहादिवदेवेति दोषावपरिहार्यौ । यथा त्वाकाशस्य अविद्याध्यारोपितघटाद्युपाधिकृतरजोधूममलवत्त्वादिदोषवत्त्वम् , तथा आत्मनः अविद्याध्यारोपितबुद्ध्याद्युपाधिकृतसुखदुःखादिदोषवत्त्वे बन्धमोक्षादयो व्यावहारिका न विरुध्यन्ते ; सर्ववादिभिरविद्याकृतव्यवहाराभ्युपगमात् परमार्थानभ्युपगमाच्च । तस्मादात्मभेदपरिकल्पना वृथैव तार्किकैः क्रियत इति ॥

रूपकार्यसमाख्याश्च भिद्यन्ते तत्र तत्र वै ।
आकाशस्य न भेदोऽस्ति तद्वज्जीवेषु निर्णयः ॥ ६ ॥

कथं पुनरात्मभेदनिमित्त इव व्यवहार एकस्मिन्नात्मन्यविद्याकृत उपपद्यत इति, उच्यते । यथा इहाकाशे एकस्मिन्घटकरकापवरकाद्याकाशानामल्पत्वमहत्त्वादिरूपाणि भिद्यन्ते, तथा कार्यमुदकाहरणधारणशयनादि, समाख्याश्च

घटाकाशः करकाकाश इत्याद्याः तत्कृताश्च भिन्ना दृश्यन्ते, तत्र तत्र वै व्यवहारविषये इत्यर्थः । सर्वोऽयमाकाशे रूपादिभेदकृतो व्यवहारः अपरमार्थ एव । परमार्थतस्त्वाकाशस्य न भेदोऽस्ति । न चाकाशभेदनिमित्तो व्यवहारोऽस्ति अन्तरेण परोपाधिकृतं द्वारम् । यथैतत् , तद्वद्देहोपाधिभेदकृतेषु जीवेषु घटाकाशस्थानीयेष्वात्मसु निरूपणात्कृतः बुद्धिमद्भिः निर्णयः निश्चय इत्यर्थः ॥

नाकाशस्य घटाकाशो विकारावयवौ यथा ।
नैवात्मनः सदा जीवो विकारावयवौ तथा ॥ ७ ॥

ननु तत्र परमार्थकृत एव घटाकाशादिषु रूपकार्यादिभेदव्यवहार इति ; नैतदस्ति, यस्मात्परमार्थाकाशस्य घटाकाशो न विकारः, यथा सुवर्णस्य रुचकादिः, यथा वा अपां फेनबुद्बुदहिमादिः ; नाप्यवयवः, यथा वृक्षस्य शाखादिः । न तथा आकाशस्य घटाकाशो विकारावयवौ यथा, तथा नैवात्मनः परस्य परमार्थसतो महाकाशस्थानीयस्य घटाकाशस्थानीयो जीवः सदा सर्वदा यथोक्तदृष्टान्तवन्न विकारः, नाप्यवयवः । अत आत्मभेदकृतो व्यवहारो मृषैवेत्यर्थः ॥

यथा भवति बालानां गगनं मलिनं मलैः ।
तथा भवत्यबुद्धानामात्मापि मलिनो मलैः ॥ ८ ॥

यस्माद्यथा घटाकाशादिभेदबुद्धिनिबन्धनो रूपकार्यादिभेदव्यवहारः, तथा देहोपाधिजीवभेदकृतो जन्ममरणादिव्यवहारः, तस्मात्तत्कृतमेव क्लेशकर्मफलमलवत्त्वमात्मनः, न परमार्थत इत्येतमर्थं दृष्टान्तेन प्रतिपिपादयिषन्नाह — यथा भवति लोके बालानाम् अविवेकिनां गगनम् आकाशं घनरजोधूमादिमलैः मलिनं मलवत् , न गगनयाथात्म्यविवेकवताम् , तथा भवति आत्मा परोऽपि — यो विज्ञाता प्रत्यक् — क्लेशकर्मफलमलैर्मलिनः अबुद्धानां प्रत्यगात्मविवेकरहितानाम् , नात्मविवेकवताम् । न ह्यूषरदेशः तृड्वत्प्राण्यध्यारोपितोदकफेनतरङ्गादिमान् , तथा नात्मा अबुधारोपितक्लेशादिमलैः मलिनो भवतीत्यर्थः ॥

मरणे सम्भवे चैव गत्यागमनयोरपि ।
स्थितौ सर्वशरीरेषु चाकाशेनाविलक्षणः ॥ ९ ॥

पुनरप्युक्तमेवार्थं प्रपञ्चयति — घटाकाशजन्मनाशगमनागमनस्थितिवत्सर्वशरीरेष्वात्मनो जन्ममरणादिराकाशेनाविलक्षणः प्रत्येतव्य इत्यर्थः ॥

## अद्वैतसिद्धिः द्वितीयः परिच्छेदः अथ जीवभेदानुकूलतर्कभङ्गः

………उपहितवृत्तितया शुद्धभेदापादनायोगात् । न च संसारस्य शुद्धगतत्वे ब्रह्मणोऽपि संसारित्वापत्तिः; बिम्बप्रतिबिम्बयोरवदातत्वश्यामत्ववत् **घटाकाशमहाकाशयोः परिच्छिन्नत्वापरिच्छिन्नत्ववत् एकस्यैव नभसस्तत्तत्कर्णपुटावच्छेदेन तत्र तत्र श्रोत्रतावच्च औपाधिकभेदेन संसारित्वासंसारित्वव्यवस्थोपपत्तेः ।**

अथांशत्वेनाप्यैक्यसिद्धिः

तथापि घटाकाशस्य महाकाशं प्रतीव **कल्पितप्रदेशत्वरूपमंशत्वं** जीवस्यावच्छेदपक्षे संभवति । स्वतो निरंशेऽपि औपाधिकांशो यथा युज्यते, तथोक्तं पुरस्तात् ।

## सर्ववेदान्तसिद्धान्तसारसङ्ग्रहःश्लोक

………घटाभावे घटाकाशो महाकाशो यथा तथा ।

उपाध्यभावे त्वात्मैष स्वयं ब्रह्मैव केवलम् ॥ ६९४ ॥ ………

## भामतीव्याख्या

………। भोक्तुर्जीवात्मनोऽविद्योपाधिकस्य स ईश्वरस्तत्पदार्थ आत्मा, तत ईश्वरादभिन्नो जीवात्मा । परमाकाशादिव घटाकाशादय इत्यर्थः । ………

## वक्तव्यकाशिका

……… श्रुतिषु घटाकाशोदाहरणेन किं प्रयोजनमित्याशङ्क्य आत्मनोऽसङ्गत्वसिद्धिः प्रयोजनमित्याह - तदर्थं घटाकाशोदाहरणमिति । ……

## वक्तव्यकाशिका

……… सम्भावनार्थवावान्दतामितिदतामिति । मृदादिदृष्टान्ते स्फटिकलोहित्येतिलौहित्यप्रतिबिम्बरज्जुरज्जुः सर्पः इतिसर्पघटाकाशतप्तपरशुदृष्टान्तैश्च उपन्यस्ता युक्तयोऽद्वितीयत्वं कर्तृत्वादेरारोपितत्वं जीवब्रह्मैक्यं प्रपञ्चासत्यत्वम् असङ्गत्वं जीवब्रह्मैक्यसत्यत्वं च सम्भवतीति………

## पूर्णानन्दीया

………प्रति कर्तृत्वमुपादानत्वं च पुरुषे दृश्यते तस्मादभिन्ननिमित्तोपादनकं कर्मेति निर्विवादोऽयं दृष्टान्तः । घटाकाशसंयोगं प्रति निमित्तत्वं समवायिकारणत्वं चाकाशेऽस्तीत्यभिन्ननिमित्तोपादानकः संयोग इत्ययमपि सर्वसम्मतो दृष्टान्तः ।……

अत्र घटाकाशवाक्यानि उपनिषद्घटकानि -

Panchapadika says: तेन 'असङ्गो न हि सज्जते' (बृ. उ. ३-९-२६) 'असङ्गो ह्ययं पुरुषः' (बृ. उ. ४-३-१५) इत्यादिश्रुतिसमर्पितासङ्गता आत्मनो न स्पष्टं दर्शितेति तदर्थं घटाकाशोदाहरणम् ।

On this Vaktavyakashika says: श्रुतिषु घटाकाशोदाहरणेन किं प्रयोजनमित्याशङ्क्य आत्मनोऽसङ्गत्वसिद्धिः प्रयोजनमित्याह - तदर्थं घटाकाशोदाहरणमिति ।

In which Shruti-s does this analogy occur? See the following:

1. जीवत्वं घटाकाशमहा-काशवद्व्यवधानेऽस्ति ।

**( नारदपरिव्राजकोपनिषत्)**

2. यत्र यत्रमृतो ज्ञानी येन वा केन मृत्युना । यथा सर्वगतं व्योम तत्र तत्र लयं गतः॥ १३
॥ घटाकाशमिवात्मानं विलयं वेत्ति तत्त्वतः । स गच्छति निरालम्बंज्ञानालोकं समन्ततः ॥ १४ **(पैङ्गलोपनिषत्)**

3. ॥एकः सन्भिद्यते भ्रान्त्या मायया न स्वरूपतः । तस्मादद्वैत एवास्ति न प्रपञ्चोन संसृतिः ॥ ७६

॥ यथाकाशो घटाकाशो महाकाश इतीरितः । तथाभ्रान्तेर्द्विधा प्रोक्तो ह्यात्मा जीवेश्वरात्मना ॥ ७७ **॥ (अन्नपूर्णोपनिषत्)**

4. घटाकाशंमहाकाश इवात्मानं परात्मनि । विलाप्याखण्डभावेन तूष्णीं भव सदा मुने॥ ७ **(अध्यात्मोपनिषत्)**

5. घटाकाशमठाकाशौ यथाकाशप्रभेदतः ।

कल्पितौ परमौ जीवशिवरूपेण कल्पितौ ॥ ४३ **(रुद्रहृदयोपनिषत्)**

6. तस्माद्द्वैतमेवास्ति न प्रपञ्चोन संसृतिः । यथाकाशो घटाकाशो मठाकाश इतीरितः ॥ ३

॥ तथा भ्रान्तै-र्द्विधा प्रोक्तो ह्यात्मा जीवेश्वरात्मना । नाहं देहो न च प्राणो नेन्द्रियाणिमनो नहि ॥ ४ **(जाबालदर्शनोपनिषत्सु)**

7. ॥एकनिष्ठतयान्तःस्थसंविन्मात्रपरो भव । घटाकाशमठाकाशौ महाकाशे प्रतिष्ठितौ॥ ५०

॥ एवं मयि चिदाकाशे जीवेशौ परिकल्पितौ । या च प्रागात्मनो मायातथान्ते च तिरस्कृता ॥ ५१ (**वराहोपनिषत्सु)**

Panchapadika says

8. (and 9)

## मुक्तिकोपनिषत्

श्रवणमनननिदिध्यासनानि नैरन्तर्येण कृत्वाप्रारब्धक्षयाद्देहत्रयभङ्गं प्राप्योपाधिविनिर्मुक्त**घटाकाशवत्परिपूर्णता विदेहमुक्तिः ।** सैव कैवल्यमुक्तिरिति । अत एव ब्रह्मलोकस्था अपि ब्रह्ममुखाद्वेदा-न्तश्रवणादि कृत्वा तेन सह कैवल्यं लभन्ते । अतः सर्वेषां कैवल्यमुक्तिर्ज्ञान-मात्रेणोक्ता । न कर्मसांख्ययोगोपासनादिभिरित्युपनिषत् ॥इति मुक्तिकोपनिषत्सु प्रथमोऽध्यायः ॥ १ ॥

तथा हैनं श्रीरामचन्द्रं मारुतिः पप्रच्छ । केयं वा तत्सिद्धिः सिद्ध्या वाकिं प्रयोजनमिति । स होवाच श्रीरामः । पुरुषस्य कर्तृत्वभोक्तृत्वसुखदुःखादि-लक्षणश्चित्तधर्मः क्लेशरूपत्वाद्बन्धो भवति । तन्निरोधनं जीवन्मुक्तिः । उपा-धिविनिर्मुक्त**घटाकाशवत्प्रारब्धक्षयाद्विदेहमुक्तिः ।** जीवन्मुक्तिविदेहमुक्त्योरष्टोत्तरशतोपनिषादः प्रमाणम्

(In Muktikopanishat )

घटसंवृतमाकाशं नीयमाने घटे यथा ।

घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः' । (अमृतबिन्दूपनिषत्-१३)

ओम् तत् सत्